# राजहंस विद्यालय, अँधेरी
## प्रवेश परीक्षा - २०१३-१४
## विषय - संस्कृत

कक्षा 10 — अंक 25

प्रश्न 1 गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5 अंक

1. एकदा शरीरस्य सर्वाणि इन्द्रियाणि–हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन्–"वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः परम् एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्यप्रभृति वयमपि कार्यं न करिष्यामः।" एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौ स्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखं अन्नकणः अपि न प्राविशत्। एवं द्वे दिने व्यतीते जते। शनैः शनैः सर्वाणि अङ्गानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि पुनः मिलित्वा विचारम् अकुर्वन्–"अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः। अतः अस्माभिः सर्वैः अनेन सह सहयोगः करणीयः।" नूनं संहतिः एव कार्यसाधिका।

I. एकपदेन उत्तरत–

(i) कौ निश्चलौ अभवताम् ?

(क) हस्तौ (ख) पादौ
(ग) हस्तपादौ (घ) स्थिरौ

(ii) भुक्तस्य अन्नस्य पाचनं तु कः करोति ?

(क) मुखम् (ख) जिह्वा
(ग) उररम् (घ) उदरमेव

II. पूर्णवाक्येन उत्तरत–

(i) कति इन्द्रियाणि मिलित्वा अचिन्तयन् ?

(ii) एकदा कानि मिलित्वा अचिन्तयन् ?

III. भाषिककार्यम्–

(i) 'कार्यशक्तिः क्षीणा' अनयोः पदयोः विशेष्यपदं किम् ?

(क) कार्यशक्तिः (ख) क्षीणा
(ग) शक्तिः (घ) कार्यम्

(ii) 'करिष्यामः' इत्यस्याः क्रियायाः कर्तृपदं लिखत–

(क) ते (ख) आवाम्
(ग) वयनपि (घ) वयम्

(iii) 'आननम्' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे प्रयुक्तः ?

(क) मुखन् (ख) उदरम्
(ग) नासिका (घ) नेत्रम्

(iv) 'शीघ्रम्' इत्यस्य शब्दस्य कः विपर्ययः अत्र आगतः ?

(क) सपदि (ख) शनैः शनैः
(ग) क्षिप्रम् (घ) शनैः

प्रश्न 2 अधोलिखितेषु वाक्येषु कोष्ठके प्रदत्तधातूनां उचितरूपेण रिक्तस्थानानि पूरयत– 5 अंक

I. 1. किम् अहम् पुस्तकम् .................... । (पठ् + लोट्)

2. पुत्रः पितरम् ......................... । (सेव् + लोट्)

3. पूजकाः देवालये ईश्वरम् ................ । (भज् + लोट्)

II. 1. आवाम् वस्तूनि मा .................. । (हृ + विधिलिङ्)

(क) हरेत (ख) हरेयुः
(ग) हरेयम् (घ) हरेव

प्रश्न 3 - 6 अंक

उचितैः धातुरूपैः वाक्यानि पूरयत–

(*i*) अहम् भोजनं ........................ । (पच् – लोट्लकारे)
(*ii*) श्रद्धावान् ज्ञानं ........................ ।(लभ् – विधि० लकारे)
(*iii*) तौ गुरुम् ............................ । (सेव् – विधि० लकारे)
(*iv*) सा शीघ्रम् उन्नतिं ................ । (कृ – लोट्लकारे)
(*v*) अध्यापकः शिष्याय ............... ।(क्रुध् – विधि० लकारे)
(*vi*) आयुष्मान् ............................ । (भू – लोट्लकारे)

प्रश्न 4 5 अंक

कोष्ठगतेषु शब्देषु उपपदविभक्ति-नियमानुसारेण उचितविभक्तिं संयोज्य रिक्तस्थानपूर्तिः कर्तव्या–

1. त्वं .................... विना कथमत्र वत्स्यसि ? (अस्मद्)
2. धिक् .................... यः एवं वदति। (दुष्ट)
3. अस्माकं देवी .................... हीनस्य बलिं न वाञ्छति? (पुत्र)
4. सीता .................... श्रेष्ठतमा बभूव। (भगिनी)
5. भारतस्य उत्तरसीमा .................... आरभ्यते। (हिमवत्)
6. मल्लः .................... अलम् अस्ति। (मल्ल)
7. वृक्षाः .................... स्निह्यन्ति (पवन)
8. .................... मथुरां गते यशोदा अरोदीत्। (कृष्ण)
9. धिक् .................... । (जाल्म)
10. .................... समया मम विद्यालयः वर्तते। (गृह)

5 अंक

## रचनात्मक-लेखनम्

**भवान् कुलदीपकः निकटे एव विल्मीतः चैन्नई नगरं गतवान्। एषा यात्रा भवते अतीव सुखदम् अविस्मरणीयं च आसीत्। भ- तस्याः यात्रायाः वर्णनं स्वमित्राय देवाय लिखिते पत्रे करोति। तत्पत्रं मञ्जूषायाः उचितैः पदैः सम्पूरयत भवान्–** [½×10=5]

शक्तिनगरम्
दिल्ली

दिनाङ्कः ........................

सेवायाम्
प्रियमित्र (*i*) ............................,
सप्रेम नमोनमः।
अत्र सर्वथा कुशलं वर्तते। भवतः कुशलतां (*ii*) ............................ याचे।
मित्र! कानिचिद् दिनानि (*iii*) ............................ अहं स्वपित्रा सह नौसेनायाः एकस्यै परीक्षायै (*iv*) ............................ गतवान्। तत्र गमनाय मम मनसि अतीव उत्सुकता आसीत्। अहम् अतीव (*v*) ............................ आसम्। अहं मम पिता च दिल्लीतः 'गरीबरथ एक्सप्रेस' रेलयानेन तत्र गतवन्तौ। मार्गे मथुरा, (*vi*) ............................ झाँसी, नागपुर (*vii*) ............................ विजयवाड़ा, नेल्लूर नगराणां महानगराणाञ्च दर्शनम् अपि भूतम्।
मित्र! तत्र गत्वा तु अतीव आश्चर्यजनकम् (*viii*) ............................ भूतम्। तस्य महानगरस्य भाषा, भोजनं (*ix*) ............................ व्यवहारञ्च सर्वम् भिन्नम् आसीत्। माम् अतीव आनन्दं प्राप्तम्। चेन्नईनगरस्य सागरतटं पोतस्थानम् च दृष्ट्वा अतीव रोमाञ्चम् अभवत्।
पुन ततः परीक्षायाः पश्चात् वायुयानेन अहं दिल्लीनगरम् आगच्छम्।
शेषं सर्वं कुशलं वर्तते। मातृपितृचरणेषु मम प्रणामाः (*x*) ............................।

भवदीयं सुहृद्
कुलदीपकः

मञ्जूषा

| बलहरशाह, कथनीयाः, देव, पूर्वम्, उत्सुकः, आगरा, आचारः, अनुभवं, ईश्वरं, चेन्नईनगरम् |
|---|